स्निग्धत्वम् । वातपित्तनाशित्वम् । रत्नप्रयोगे प्रधानत्वम् । परं रसायनकारित्वञ्च । तस्य लक्षणं यथा,—

"स्निग्धं गुरुगात्रयुतं दीप्तं स्वच्छं समाङ्गञ्च
सुरङ्गदञ्च ॥"

इति जात्यमाणिक्यं कल्याणं धारणात् कुरुते ॥
तस्य दोषो यथा,—

"द्विच्छायमभ्रपिहितं कर्कशं शार्कारिलं
भिन्नं धूम्रञ्च ।
विरूपं रागविमलं लघुमाणिक्यं न धारये-
द्धीमान् ॥"

तस्य चतुर्विधा जातिर्यथा ।

"तद्रक्तं यदि पद्मरागमथ तत्पीतातिरक्तं द्विधा ।
जानीयात् कुरुबिन्दकं यदरुणं स्यादेष सौग-
न्धिकम् ।
तन्नीलं यदि नीलगन्धिकमिति ज्ञेयं चतुर्धा बुधैः
माणिक्यं कथयन्त्यपि विकलं रागेण जात्यं
जगुः ॥"

इति राजनिर्घण्टः ॥ * ॥

मतान्तरे तस्य दोषा यथा,—

"माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः
द्विच्छायश्च द्विरूपश्च सम्भेदः कर्करस्तथा ॥
अशोभनं कोकिलञ्च जलं धूम्राभिधञ्च वै ।
गुणाश्चत्वार आख्यातास्छायाः षोड़श
कीर्त्तिताः ॥"

छायास्तु पूर्व्वोक्ता एव तास्तु पद्मरागशब्दे द्रष्टव्याः ।

"छायाद्वितयसम्बन्धाद्विच्छायं बन्धुनाशनम् ।
द्विरूपं द्विपदं तेन माणिक्येन पराभवः ॥
सम्भेदो भिन्नमित्युक्तं शस्त्रघातविधायकम् ।
कर्करं कर्करायुक्तं पशुबन्धुविनाशकृत् ॥
दुग्धेनेव समालिप्तमघनीपुटमुच्यते ।
अशोभनं समुद्दिष्टं माणिक्यं बहुदुःखकृत् ॥
मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम् ।
आयुर्लक्ष्मीयशो हन्ति सदोषं तन्न धारयेत् ॥
रागहीनं जलं प्रोक्तं धनधान्यापवादकृत् ।
धूम्रं धूमसमाकारं वैद्युतं भयमावहेत् ॥"

तथा ।

"शोभाद्वितयवन्तो ये मणयः क्षतिकारकाः ।
उभयत्र पदं येषां तेन च स्यात् पराभवः ॥
भिन्नेन युद्धे मृत्युः स्यात् कर्करन्धननाशकृत् ।
दुग्धेनेव समालिप्तः पुटकै यस्तु सम्भवेत् ॥
दुःखकृत् स समाख्यातो न नृपै रक्षणीयकः ।
मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता ।
तेषाञ्च बहुभेदाः स्युर्न ते धार्य्याः कदाचन ॥"

अथ गुणाः ;

"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता ।"

तथा च ।

"वर्णाधिकं गुरुत्वञ्च स्निग्धता च तथाच्छता ।
अर्च्चिष्मत्ता महत्ता च मणीनां गुणसंग्रहः ॥"

फलम् ।

"ये कर्कराश्छिद्रमयोऽपदिग्धाः
प्रभाविमुक्ताः परुषा विवर्णाः ।
न ते प्रशस्ता मणयो भवन्ति
समासतो जातिगुणैः समस्तैः ॥
दोषोपसृष्टं मणिमप्रबोधाद्
बिभर्त्ति यः कश्चन कश्चिदेकम् ।
तं बन्धुदुःखामयबन्धुवित्त-
नाशादयो दोषगणा भजन्ते ॥
सपत्नमध्येऽपि कृताधिवासं
प्रमादवृत्तावपि वर्त्तमानम् ।
न पद्मरागस्य महागुणस्य
भर्त्तारमापत् समुपैति काचित् ॥
दोषोपसर्गप्रभवाश्च ये ते
नोपद्रवास्तं समभिद्रवन्ति ।
गुणैः समस्तैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति ॥
बालार्ककरसंस्पर्शात् यः शिखां लोहितां
वमेत् ।
रञ्जयेदाश्रमं वापि स महागुण उच्यते ॥
दुग्धे शतगुणे क्षिप्तो रञ्जयेद्यः समन्ततः ।
वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे यो न्यस्तः सन् महामणिः ।
प्रकाशयति सूर्य्याभः स श्रेष्ठः पद्मरागकः ॥
पद्मकोषे तु यो न्यस्तो विकाशयति तत्क्षणात् ।
पद्मरागवरो ह्येष देवानामपि दुर्लभः ॥
सर्व्वारिष्टप्रशमनाः सर्व्वसम्पत्तिदायकाः ।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम् ॥
यो मणिर्द्दृश्यते दूराज्ज्वलदग्निसमच्छविः ।
वंशकान्तिः स विज्ञेयः सर्व्वसम्पत्तिदायकः ॥
पञ्चसप्तनवविंशतिरागः
सम्भृतोऽपि सकलः खलु वर्द्धे ।
वर्जयेद्गमति वा करजालं
उत्तरोत्तरमहागुणिनस्ते ॥
नीलीरसं दुग्धरसं जलं वा
ये रञ्जयन्ति द्विशतप्रमाणम् ।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः ॥
गुञ्जाफलप्रमाणस्तु दशसप्तत्रिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
क्रोष्टुकोलफलाकारो द्वादशाष्टाब्धिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
बदरीफलतुल्यो यः खरद्विवसुमाषकः ।
तथा धात्रीफलस्त्रिंशत्विंशतिदशष्टमाषकः ॥
तथाचफलतुल्यो यो वह्निपञ्चैकमाषकः ।
ताम्बूलफलमानो यश्चतुस्त्रिद्विकतोलकः ।
बिम्बीफलसमाकारो वसुषड्दशतोलकः ॥
अतःपरं प्रमाणेन मानेन च न लभ्यते ।
यदि लभ्येत पुण्येन तदा सिद्धिमवाप्नुयात् ॥
केचिच्चारतराः सन्ति जात्यानां प्रतिरूपकाः ।
विजातयः प्रयत्नेन सिद्धास्ता मूल्यमाहरेत् ॥
काङ्कलकाः सिंहलदेशोत्थमुक्तमालीयाः ।
श्रीपर्णिकाश्च सदृशा विजातयः पद्मरागाणाम् ॥
तुषोपसङ्गाद्दहनाभिधानं
मणिः स्वभावादपि तुम्बुरूत्थः ।
काण्यात्तथा सिंहलदेशजातं
मुक्ताभिधानं नभसः स्वभावात् ।
श्रीपर्णकं दीप्तिनिराकृतित्वा-
द्विजातिलिङ्गाश्रयभेद एषः ॥ * ॥"

तथा च ।

"स्नेहप्रदेहो मृदुता लघुत्वं
विजातिलिङ्गं खलु सार्व्वजन्यम् ।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाणामिव चूर्णमध्यः ॥
स्नेहप्रदिग्धो न च यो विभाति
यो वा प्रमृज्यः प्रजहाति दीप्तिम् ।
आक्रान्तमूर्द्धा च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति ॥
संप्राप्य तःक्षोऽपि कथं स्वरत्नं
बिभर्त्ति यः सर्व्वगुणानतीव ।
तुल्यप्रमाणस्य च तुल्यजाते-
र्यो वा गुरुत्वेन भवेन्न तुल्यः ।
प्राप्यापि नानाकरदेशजातं
ज्ञात्वा बुधो जातिगुणेन लक्षेत् ॥
अप्रणश्यति सन्देहे शिलायां परिघर्षयेत् ।
दृष्ट्वा योऽत्यन्तशोभावान् परिमाणं न मुञ्चति ॥
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाश्चान्ये विजातयः ।
स्वजातकं संमुखेन विलिखेद्वा परस्परम् ॥
वज्रं वा कुरुविन्दं वा विमुच्यान्योन्यकेन चेत् ।
न शक्यं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः ॥
गुणोपपन्नेन सहावबन्धो
मणिस्वजात्यो विगुणेन जातः ।
सुखं न कुर्य्यादपि कौस्तुभेन
विद्वान् विजातिं न भयाद्बुधस्तम् ॥
चण्डाल एकोऽपि तथाभिजातान्
समेत्य दूरानपहन्ति यत्नात् ।
तथा मणीन् भूरिगुणोपपन्नान्
शक्तोऽतिविद्रावयितुं विजातः ॥" * ॥

अथ मूल्यम् ।

"बालार्काभिमुखं कृत्वा दर्पणे धारयेन्मणिम् ।
तत्र कान्तिविभागेन च्छायाभागं विनिर्द्दिशेत् ॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं
मूल्यं समुत्थापितगौरवस्य ।
तत् पद्मरागस्य गुणान्वितस्य
स्यान्माषकाख्यातुलितस्य मूल्यम् ॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम् ।
तावन्मूल्यं तथा शुद्धे कुरुविन्दे विधीयते ॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम् ।
तावन्मूल्यं चतुर्थांशहीनं स्यादै सुगन्धिके ॥
यावन्मूल्यं समाख्यातं वैश्यवर्णे च सूरिभिः ।
तावन्मूल्यचतुर्थांशं हीयते शूद्रजन्मनि ॥
पद्मरागः पणं यस्तु धत्ते लाक्षारसप्रभः ।
कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः ॥
इन्द्रगोपकसङ्काशः कर्षैंचयधृतो मणिः ।
द्वाविंशतिसहस्राणि तस्य मूल्यं विनिर्द्दिशेत् ॥
एकोनो नूयते यस्तु जवाकुसुमसन्निभः ।